यतिपुङ्गवश्रीमद्-ऋद्धिचन्द्रेण निर्मितम् ।

# । मृगाङ्कचरित्रम् ।

इदं पुस्तकं मुम्बय्यां ए. एम्. कंपनी, इत्यनेन निर्णयसागरमुद्रणास्पदे मुद्रापितं प्रकाशितं च ।

वीरसंवत् २४४३ विक्रम १९७३ क्राइष्ट १९१७.

वेतनम् ५ आणकाः

Printed by Ramchandra Yesu Shedge, Nirnaya-Sagar Press, 23, Kolbhat Lane, Bombay.

Published by Manchand Velchand, Gopipura—SURAT.

पुस्तकप्राप्तिस्थानम्

पं० त्रिभुवनदास अमरचंद
पालीताणा.

शा० मानचंद वेलचंद
गोपीपुरा–सुरत.

। श्रीमदृद्धिचन्द्रेण निर्मितम् ।

# । मृगाङ्कचरित्रम् ।

श्रीचिन्तामणिपार्श्वनाथाय नमः । श्रीगुरुभ्यो नमः ।

श्रीपार्श्वः प्रत्यहं जीयात् स श्रीमान् वसुधातले । प्रोद्यद्गुणालिसद्धामपार्श्वसेवितपार्श्वकः ॥ १ ॥
यो ददाति महद्भद्रं भव्यानां भीतिभञ्जनः । भास्वद्भानुसमाकारो निजवंशमरुत्पथे ॥ २ ॥ युग्मम्
भारति ! भारतीं स्फारां दद्यास्त्वमेव सत्वरम् । सुराणामपि शर्मौघप्रदामेवामृतप्रभाम् ॥ ३ ॥
सच्चरित्रं मृगाङ्कस्य करिष्येऽहं जनप्रियम् । नत्वा स्वगुरुपादाब्जं निर्मलद्युतिभासुरम् ॥ ४ ॥
जम्बूद्वीपेऽत्र भरतक्षेत्रं विश्वविभूषणम् । नदीपर्वतसद्ग्रामतुङ्गश्रेणिसमन्वितम् ॥ ५ ॥
तत्रास्ति नगरी रम्या वाराणसी जनाकुला । प्रोत्तालवप्रपरिखा वापीकूपसरोऽन्विता ॥ ६ ॥
विहारवर्णवामाङ्गीवाग्मिवारणवाजिभिः । वणिग्वाचंयमवृन्दवैद्यैश्च परिशोभिता ॥ ७ ॥
यतः—वापीवप्रविहारवर्णवनिता वाग्मी वनं वाटिका वैद्यो विप्रकवारिवादिविबुधा वेश्या वणिग् वाहिनी ।

विद्या वीरविवेकवित्तविनया वाचंयमा वल्लिका, वस्त्रं वारणवाजिवेसरवरं राज्यं चवैः शोभते ॥ ८ ॥
राज्यं चकार तस्यां सद् मकरध्वजभूपतिः । रूपेण जितकन्दर्प्पः प्रतापाक्रान्तभास्करः ॥ ९ ॥
न्यायवल्लीपयोवाहः कामधर्म्मार्थतत्परः । विशुद्धकुलसम्भूतः शस्त्रशास्त्राब्धिपारगः ॥ १० ॥
तस्करो यस्य देशेषु बन्धनं नास्ति कुत्रचित् । रोगश्शोककरश्चैव भयं वैरं परस्परम् ॥ ११ ॥
सचिवस्तस्य विख्यातो वर्त्तते स्म महीपतेः । सुबुद्धिरिति नाम्ना हि कुशाग्रबुद्धिऋद्धिभृत् ॥ १२ ॥
राज्यभारधरो नित्यं सर्वशास्त्रविशारदः । परचित्तस्य सङ्कल्पज्ञाता भोग्यकभोगकः ॥ १३ ॥
निम्नसागरगम्भीरो बुद्ध्या च धीषणोपमः । समग्रगुणसंयुक्तो जनानां मोहकारकः ॥ १४ ॥
तस्य राज्ञः प्रिया रेजे नाम्ना मदनवल्लभा । समग्रगुणमञ्जुषा रूपेण मदनप्रिया ॥ १५ ॥
तस्या वदनमाभाति रजनीशसमप्रभम् । सुधौतधामसद्धाम पद्मपत्रसुलोचनम् ॥ १६ ॥
सा भाति भुवने रम्या शीलेन जनकात्मजा । सर्वशृङ्गारसंयुक्ता चातुर्यगुणशोभिता ॥ १७ ॥
तस्याः सूनुः सदा रेजे रूपसुन्दरनामतः । विनयादिगुणाधारः समग्रसुकलान्वितः ॥ १८ ॥
रूपेण जितदेवेन्द्रः शस्त्रविद्याविभूषितः । शास्त्रालङ्कारशिल्पज्ञः प्रसिद्धबुधसेवितः ॥ १९ ॥
तस्य शरीरमाभाति रम्भागर्भातिकोमलम् । लसल्लक्षणसंयुक्तं कल्याणविमलद्युति ॥ २० ॥

तस्यां वसति दाता हि श्रेष्ठी कुसुमसारकः । परिवारेण संयुक्तः विख्यातः क्षितिमण्डले ॥ २१ ॥
जनव्रजेषु कल्पद्रुः द्रव्येण धनदोपमः । धर्मकर्मविधौ दक्षः रूपेण रतिवल्लभः ॥ २२ ॥
तस्यास्ति रमणी रम्या स्वयंप्रभाभिधा शुभा । केलीवत्कोमलाङ्गी च कलाकलापधारिका ॥ २३ ॥
विराजते मुखं तस्या विकस्वरकजप्रभम् । सद्दन्तनयनैर्युक्तमर्चितं जनदृक्कजैः ॥ २४ ॥
तस्याः कुक्षौ समुत्पन्नो मृगाङ्को मृगनेत्रजित् । गत्या तर्जितमत्तेभो वक्त्रेण यामिनीपतिः ॥ २५ ॥
वृद्धिं प्राप कुमारोऽसौ यावदेवाष्टवार्षिकः । मुक्तः पित्रा गुरूपान्ते कलाग्रहणहेतवे ॥ २६ ॥
यतः—माता शत्रुः पिता वैरी येन बालो न पाठितः । न शोभते सभामध्ये हंसमध्ये बको यथा ॥ २७ ॥
लालयेत् पञ्च वर्षाणि अष्ट वर्षाणि पाठयेत् । प्राप्ते तु षोडशे वर्षे, पुत्रं मित्रं समाचरेत् ॥ २८ ॥
अथ तत्रैव नगरे धनञ्जयो महर्द्धिकः । वसति प्रमदा तस्य प्रिया धनवती शुभा ॥ २९ ॥
तयोः पुत्री गुणश्रेणिः पद्मावती कजेक्षणा । तद्दिने सापि मुक्ता च पठनाय निरालसा ॥ ३० ॥
पद्मावतीमृगाङ्कौ तौ कलाभ्यासं प्रकुर्वतः । क्षीरनीरनिभा नित्यमासीत्प्रीतिस्तयोर्मिथः ॥ ३१ ॥
यतः—"पय पानी उपर मिले अंतर मिलो नहीर । किं उमराल नीरह तजी किं उगही पीइ सुषीर ॥ ३२ ॥
षीरवारि स्युं प्रीति अति इह जानत सब कोय । करत जुदाई हंसषल षलथिं कहा न होय"। ॥ ३३ ॥

एकस्मिन्समये तस्मिन्ननध्यायः समागतः । छात्रपठनशालायां स्थिता पद्मावती स्वयम् ॥ ३४ ॥
पुत्रः कुसुमसारस्य क्रीडां कर्त्तुं गृहे गतः । स्मृत्वा पद्मावतीं चित्ते चलितः स्नेहनोदितः ॥ ३५ ॥
व्रजन् मार्गे च मिलितः धनञ्जयो धनैर्भृतः । अशीतिकपर्दान् तस्मै स ददौ स्वसुताकृते ॥ ३६ ॥
गृहीतस्तेन कूष्माण्डपाको वर्त्मनि गच्छता । कथयिष्यति सा किं मामिति विचिन्त्य भक्षितः ॥ ३७ ॥
पद्मावतीसमीपे स भक्षयित्वा गतस्ततः । तया प्रश्नः कृतस्तस्य, भक्षितं भोस्त्वयाद्य किम् ? ॥ ३८ ॥
कुमारस्तामुवाचैवं दत्ताशीतिकपर्दकाः । तव पित्रा त्वदर्थं च मम हस्तेऽतिरागतः ॥ ३९ ॥
विक्रीय तान् मया सर्वान् लात्वा कूष्माण्डपाककम् । भक्षितः स्वादतो नूनं भुक्त्वा चाहमिहागतः ॥ ४० ॥
तच्छ्रुत्वा कुपिता सा चोवाच वक्रेण तत्पुरः । नैतत् कार्यं हि मित्राणामेकाकित्वेन भोजनम् ॥ ४१ ॥
पश्चादुवाच सा बाला मृगाङ्ककुमरं प्रति । पुनः किं ते मया वाच्यं स्वोदरं भरितं त्वया ॥ ४२ ॥
भक्ष्यलेशोऽपि मह्यं च न दत्तस्त्वयकाऽधम ! । शिक्षां ददामि किं ते च नूनं मैत्र्यात् पुनः पुनः ॥ ४३ ॥
यदा भवन्ति मत्पार्श्वे कपर्दाः कुमर ! शृणु । तदाहं भूषणं रम्यमकार्षं कर्णकुण्डलम् ॥ ४४ ॥
श्रुत्वेति वचनं तस्याः खेदखिन्नोऽभवच्छिशुः । अनया मयि मित्रत्वं साम्प्रतं न विचारितम् ॥ ४५ ॥
विमृश्येत्येव स शावो मौनं कृत्वा स्थितस्ततः । भविष्यति मदायत्ता शिक्षां दास्ये यदा तदा ॥ ४६ ॥

इति चिन्तयतः प्रीतिर्बभूव मनसा विना । कलाकुशलतां सम्यक् तौ प्राप्तौ गुरुभक्तितः ॥ ४७ ॥
यतः–"वार्तिं कीइं कवण गुण जिहां नवि मलिउं मन्न । मन्नविहुणो प्रेमरस जाणे अलुणो अन्न ॥ ४८ ॥
मनु तोलो तनु ताजवी हे सखी ! नेह केता मण होय । लांगंते लेखुं नहीं टूटइ टांक न होय" ॥ ४९ ॥
पद्मावतीमृगाङ्कौ तौ स्वस्वधाम्नि गतावुभौ । पठित्वा सर्वशास्त्राणि गुरुनिर्देशतो मुदा ॥ ५० ॥
क्रमेण यौवनं प्राप कुमारः कमलेक्षणः । पिता तस्य कृते कन्यां लोकयामास तत्पुरे ॥ ५१ ॥
एकस्मिन् दिवसे श्रेष्ठी पद्मावतीं ददर्श च । समग्रगुणमञ्जूषां शीलालङ्कारधारिणीम् ॥ ५२ ॥
धनञ्जयसमीपे स स्वाङ्गजार्थं ययाच ताम् । कुमारसदृशां चैव वयसा विद्यया गुणैः ॥ ५३ ॥
धनञ्जयस्तद्वचनमङ्गीचकार निश्चितम् । शुभं मुहूर्त्तमालोक्य विवाहः क्रियते ध्रुवम् ॥ ५४ ॥
तयोः शुभेऽह्नि विप्रेण विवाहस्तत्र मेलितः । पञ्चशब्दादिवादित्रैः गीतनृत्यैः पुरस्सरम् ॥ ५५ ॥
गजतुरगसङ्घातैः सुखासनैश्च सद्ध्वजैः । याचकव्रजसद्दानैः तूर्यसन्दोहसुन्दरैः ॥ ५६ ॥
अनेकोत्सवसन्दोहैश्चक्रतुः श्रेष्ठिशेखरौ । तयोर्नूनं शुभे लग्ने पाणिग्रहणमद्भुतम् ॥ ५७ ॥ युग्मम् ।
कृतोद्वाहं मनोऽभीष्टं समानीता स्वसद्मनि । हर्षं प्रापेति स श्रावः फलितं मम वाञ्छितम् ॥ ५८ ॥
तावेव दम्पती तत्र भोजयामासतुः सुखम् । प्रसुप्तावेकदा स्वैरं रजन्यां सप्तमे गृहे ॥ ५९ ॥

मृगाङ्को वचनं तस्याः सस्मार हृदि तत्क्षणे । मारयाम्यहमेनां किम् अबलां बलवर्जिताम् ॥ ६० ॥
गच्छाम्यपरदेशेष्वेनां मुक्त्वाऽत्रैव साम्प्रतम् । येनैषा लभते सद्यः स्वकीयवचसः फलम् ॥ ६१ ॥
यतः—आज्ञाभङ्गो नरेन्द्राणां गुरूणां मानमर्द्दनम् । पृथक् शय्या च नारीणामशस्त्रवध उच्यते ॥ ६२ ॥
आपृच्छ्य पितरौ प्रातो मृगाङ्को गमनोत्सुकः । चकार पोतसामग्रीं वाणिज्यार्थं च सत्त्ववान् ॥ ६३ ॥
यतः—लक्ष्मीर्वसति वाणिज्ये किंचिदस्ति च कर्षणे । अस्ति नास्ति च सेवायां भिक्षायां न कदाचन ॥ ६४ ॥
प्रत्युवाच मृगाङ्कस्तामिति मे वचनं कुरु । भद्रे ! त्वयात्र स्थातव्यं देशान्तरे व्रजाम्यहम् ॥ ६५ ॥
यतः—दीसइ विविहचरिअं जाणिज्जइ सज्जणदुज्जणविसेसो । अप्पाणं च कलिज्जइ हिंडिज्जइ तेण पोहवीए ॥ ६६ ॥
गृहकार्यं च कर्तव्यं शीर्षा रक्षेस्ततः पराम् । सुभ्रु ! कार्या त्वया पित्रोर्भक्तिर्देव—गुरौ तथा ॥ ६७ ॥
आकर्ण्य वचनं तस्य प्रत्यूचे निजवल्लभम् । आगमिष्ये भवत्सार्धं छायेव वपुषः सदा ॥ ६८ ॥
गृहे स्थातुं न युक्तं हि योषितां पतिना विना । प्राणान्ते न हि मुञ्चामि समीपं भवतस्ततः ॥ ६९ ॥
तया सार्धं मृगाङ्कोऽसौ प्रणम्य चरणं पितुः । अम्बुधौ यानपात्रं च व्यारुरोह शुभे दिने ॥ ७० ॥
ततश्चचाल पोतस्थो मृगाङ्को जलवर्त्मनि । क्रीडां कुर्वन् तया सार्धमनेकगुणसंयुतः ॥ ७१ ॥
क्रमेण राक्षसद्वीपं तरण्डः प्राप तस्य सन् । तं द्रष्टुं रक्षितस्तत्र मृगाङ्केनैव लीलया ॥ ७२ ॥

उत्तेरुः पोततः सर्वे चक्रुः कार्याणि ते जनाः । केचिद् गीतानि गायन्ति केचित् क्रीडन्ति निर्भरम् ॥ ७३ ॥
आनयन्ति जलं केचित् केचित् कुर्वन्ति भोजनम् । केचित् स्नानं प्रकुर्वन्ति दीर्घिकासु विशेषतः ॥ ७४ ॥
केचिद् बन्धून् समाहूय दर्शयन्ति च कौतुकम् । इत्यादिक्रीडया सर्वे तिष्ठन्ति तत्र निर्भयम् ॥ ७५ ॥
उत्ततार मृगाङ्कोऽपि कान्तया कान्तया युतः । दर्शयित्वा वनं सर्वं सुष्वाप केलिमन्दिरे ॥ ७६ ॥
घोरनिद्रां वधूं दृष्ट्वा कुमारश्चोत्थितस्ततः । स्मृत्वा च वचनं पूर्वं मन्युनाऽरुणलोचनः ॥ ७७ ॥
मध्यरात्रौ प्रगतायां लेखा–ऽशीतिकपर्दकान् । प्रबद्धा च मृगाङ्केन पद्मावत्यञ्चले ततः ॥ ७८ ॥
तल्लेखे लिखितं तेन मयोदरं च पूरितम् । अथैतान् कपर्दान् भद्रे! गृहीत्वा कुरु भूषणम् ॥ ७९ ॥
स्वप्रियां तत्र मुक्त्वा च चलितः पोतसन्मुखम् । पूत्कारमिति चक्रे स राक्षसैर्भक्षिता वधूः ॥ ८० ॥
इक्कारितं मृगाङ्केनोपविश्य पोतमद्भुतम् । क्रमेण गच्छता मार्गे संजातस्तपनोदयः ॥ ८१ ॥
धनञ्जयसुता तत्र जागृता केलिमन्दिरे । मां मुक्त्वा च गतः कुत्र चिन्तितमिति मे पतिः ॥ ८२ ॥
अर्पिताहं च भर्त्तारं मिलित्वा मातृपितृभिः । न मुञ्चति वनेऽसौ मां यानपात्रे भविष्यति ॥ ८३ ॥
साऽपि जगाम तत्पोतं गत्वा तत्र विलोकितम् । न यानं न च भर्ता हि धरित्र्यां पतिता ततः ॥ ८४ ॥
चकार रोदनं तस्मिन् पद्मावती वियोगिनी । किं करोमि क्व गच्छामि रमणेन विनाऽधुना ? ॥ ८५ ॥

"सुख गयां सवि सासरइ पीहर टलीउं मान । कंतविहूणी गोरडी जिंहा जाइ तिंहा रान ॥ ८६ ॥
हियडा! झूर म मुष्टिकर झूरत नयणे हाणि । कवण सुणेस्यइ रानमां रोयुं कंठ पराण ॥ ८७ ॥
दैवें कीधां दूरि दोहिलुं केतुं आणीइ । हीयडा करि संतोस करम सिख्युं फल पाईइ ॥ ८८ ॥
यतः—उदयति यदि भानुः पश्चिमायां दिशायां, प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां, न चलति विधिवशानां भाविनी कर्म्मरेखा ॥ ८९ ॥
बभूव सावधाना सा प्रसरच्छीतवायुना । तदैव स्वाञ्चले दृष्ट्वा लेखान्वितकपर्दकान् ॥ ९० ॥
वाचयामास तल्लेखं पद्मावती वने स्थिता । प्रत्युवाचेति भर्त्तारं युक्तः कोपोऽत्र ते न भोः ! ॥ ९१ ॥
उत्तमैर्न कदा कार्यं योषितां वनमोचनम् । विललाप स्थिता तत्र सीतेवाऽरण्यमध्यगा ॥ ९२ ॥
भवतु तव कल्याणं त्वं मां मुक्त्वा गतः परम् । इत्याशीः प्रददौ श्रेष्ठिनन्दनी निजवल्लभम् ॥ ९३ ॥
भविष्यतीह त्वत्सङ्गो मया सार्धं यदा धव ! । तदाहं तव दास्यामि कांचित् शिक्षां च निश्चितम् ॥ ९४ ॥
अथ जिनप्रभावाच्च कष्टौघो यास्यति क्षयम् । आदितीर्थंकृतो मूर्तिं चकाराऽतो मृगेक्षणा ॥ ९५ ॥
निवेश्य प्रतिमां शैले प्रानर्च सततं वधूः । तदग्रे श्रीनमस्कारान् सा च जपति यावतः ॥ ९६ ॥
यतः—सङ्ग्राम-सागर-करीन्द्र-भुजङ्ग-सिंह-दुर्व्याधि-वह्नि-रिपु-बन्धनसंभवानि ॥

चौर–ग्रह–भ्रम–निशाचर–शाकिनीनां, नश्यन्ति पञ्चपरमेष्ठिपदैर्भयानि ॥ ९७ ॥
यो लक्षं जिनबद्धलक्ष्यसुमनाः सुव्यक्तवर्णक्रमं श्रद्धावान् विजितेन्द्रियो भवहरं मन्त्रं जपेत् श्रावकः ।
पुष्पैः श्वेतसुगन्धिभिश्च विधिना लक्षप्रमाणैर्जिनं यः संपूजयते स विश्वविदितः श्रीतीर्थराजो भवेत् ॥ ९८ ॥

वने रणे शत्रु—जला–ऽग्निमध्ये, महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥ ९९ ॥

अतो बबन्ध सा बाला पर्वतोपरि सद्ध्वजम् । विदश्यैनं यतः कोऽप्यत्रागच्छति व्रजन्पथि ॥ १०० ॥
क्रमेण कोऽपि तन्मार्गे गच्छंश्च व्यावहारिकः । ध्वजं दृष्ट्वा च तद्द्वीपे तरण्डो रक्षितस्ततः ॥ १०१ ॥
उत्तीर्य वणिजां मुख्यो जवात् तत्र नगे गतः । अर्हत्भक्तिपरां बालां ददर्श रूपसुन्दरीम् ॥ १०२ ॥
इति पप्रच्छ तां श्रेष्ठी त्वं तिष्ठसि कथं वने ? । देवी वा किन्नरी वा त्वं भद्रे कथय मां प्रति ॥ १०३ ॥
पूर्णं ध्यानं च कृत्वा सा, श्रुत्वेति तद्वचोऽवदत् । भ्रातोऽहं श्रेष्ठिनः पत्नी यानभङ्गादिहागता ॥ १०४ ॥
उवाच तां पुनः श्रेष्ठी भगिनि ! मे वचः शृणु । आगच्छ त्वं मया सार्धं मोचयिष्ये शुभस्थले ॥ १०५ ॥
सा विधायार्हतः पूजां चचाल श्रेष्ठिना सह । चलितं श्रेष्ठिन श्चित्तं वधूपरि व्रजन्पथि ॥ १०६ ॥
यतः–पुष्पं दृष्ट्वा फलं दृष्ट्वा दृष्ट्वा नारीं सुशोभिताम् । तानि त्रीणि वने दृष्ट्वा कस्य न चलति मनः ? ॥ १०७ ॥

भगिनीं कथयित्वेमां वचनाच्चलितः शठः । ज्ञात्वेति शासनदेव्या तत्पोतः खण्डशः कृतः ॥ १०८ ॥
सा वधूः फलकं लब्ध्वा प्रोत्तरन्ती पयोनिधिम् । उल्लालिता गजेन्द्रेण शुण्डया सुरवर्त्मनि ॥ १०९ ॥
विद्याधरविमाने सा पतितातीव सुन्दरी । उवाच कार्मुकं वाक्यं तस्या विद्याधराधिपः ॥ ११० ॥
विद्याधरं च सा बाला वचसा प्रत्यबोधयत् । स शीलादिगुणैस्तुष्टस्तिस्रो विद्या ददौ वराः ॥ १११ ॥
यतः—सीलं उत्तमं वित्तं सीलं आरोग्गकारणं परमं । सीलं भोगनिहाणं सीलं ठाणं गुणगणाणं ॥ ११२ ॥
अदृष्टकरणीं विद्यां परविद्याविनाशनीम् । अन्यरूपकरीं चैव सापि जग्राह तत्क्षणे ॥ ११३ ॥
अहं मुञ्चामि कुत्र त्वां बाले ! कथय मत्पुरः । तयोक्तं सुसुमाराख्यपुरे मुञ्च महाशय ! ॥ ११४ ॥
स बालां तत्पुरोद्याने मुक्त्वा स्वसदने गतः । साऽन्यरूपपरावर्त्या विद्यया पुरुषोऽभवत् ॥ ११५ ॥
सहसाङ्केति नाम्नाऽसौ भूत्वा जगाम तत्पुरे । पुष्पलावीगृहे तस्थौ लीलया क्रीडयन् भृशम् ॥ ११६ ॥
नगरस्य जनाः सर्वे आयान्ति तस्य संनिधौ । सोऽपि समस्तशास्त्राणि सर्वेषां वदति स्फुटम् ॥ ११७ ॥
मालिनीसदने तिष्ठन्मे जाता बहवो दिनाः । विना द्रव्येण मद्भक्तिरनया क्रियते भृशम् ॥ ११८ ॥
कदाचित् कलया कृत्वा द्रव्यं ददामि तत्करे । इति मत्वा करे तस्या आर्पयच्च कपर्दकान् ॥ ११९ ॥
उवाचेति भृशं श्रेष्ठिनन्दनो मारविग्रहः । मत्कपर्दान् गृहीत्वा त्वं वहाण्यानय मालिनि ! ॥ १२० ॥

सद्वर्हाणि समानीय, कुमाराय च सा ददौ । कृतस्तेन नरब्रह्मनामाङ्कितः सुव्यञ्जनः ॥ १२१ ॥
इत्युक्त्वा स ददौ तस्या हस्ते व्यञ्जनकं मुदा । पञ्चशतैश्च दीनारैः विक्रेयः षोडशाधिकैः ॥ १२२ ॥
विक्रेयार्थं गृहीत्वा सा गता व्यञ्जनकं मुदा । वदन्ती मालिनी मूल्यं चतुष्पथे जनाकुले ॥ १२३ ॥
जनाः पुरस्य तत्पार्श्वे दर्शनार्थं समागताः । एकः करे गृहीत्वा तं पश्यति स्म निरर्थकम् ॥ १२४ ॥
पप्रच्छैकस्तस्य मूल्यं वायुं क्षिपति कश्चन । वदत्येको न गृह्णामि हास्यमेके प्रकुर्वति ॥ १२५ ॥
इयं जाता हि ग्रथिला वदन्त्येते मिथो जनाः । यदास्ति द्रव्यमेतच्च प्राप्यन्ते व्यञ्जनोत्कराः ॥ १२६ ॥
एकस्य हृदये जातमाश्चर्यं बहुमूल्यतः । कथितस्तेन वृत्तान्तः नरब्रह्मनृपाय च ॥ १२७ ॥
स तामाकारयामास कौतुकाद् नृपतिर्जवात् । साऽपि गत्वा स्थिता पार्श्वे प्रणम्य नृपतिं च तम् ॥ १२८ ॥
तं स्वनामाङ्कितं दृष्ट्वा व्यञ्जनं हर्षितो नृपः । आपृच्छ्य मालिनीं मूल्यं द्विगुणं दत्तवान् नृपः ॥ १२९ ॥
पुनः पप्रच्छ तां राजा निर्मितः केन व्यञ्जनः । मालिन्यूचे महीनाथ! वैदेशिकोऽस्ति मद्गृहे ॥ १३० ॥
रूपलावण्यसंपन्नो विद्यया कलितो युवा । तेनायं निर्मितो रम्यस्तव नामसमन्वितः ॥ १३१ ॥ युग्मम् ॥
श्रुत्वेत्याकारयामास तं कुमारं नराधिपः । पुष्पलावीगृहात्सोऽप्यागत्याऽऽननाम तं शिरः ॥ १३२ ॥
विद्यावन्तं विदित्वा तं नरब्रह्मनराधिपः । मुमोचात्माङ्गजान् सद्यस्तत्पार्श्वे पठनाय च ॥ १३३ ॥

शब्दनीतिलसत्काव्य-शास्त्रछन्दांसि भूरिशः । एतानि सर्वशास्त्राणि पाठयैतान् ममाज्ञया ॥ १३४ ॥

यतः-विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता, विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥१३५॥

उवाच सहसाङ्कोऽसौ नरब्रह्ममिति स्फुटम् । एतेषां पाठनकृते मन्दिरं मे समर्पय ॥ १३६ ॥

राज्ञा तस्मै गृहं दत्तं तस्थिवान् सोऽपि निर्भयः । कुमारान् पाठयामास तान् सर्वान् हि निरन्तरम् ॥१३७॥

छन्दोऽलङ्कारसङ्गीतगूढार्थन्यायनीतयः । एतानि सर्वशास्त्राणि पेठुस्ते च विशेषतः ॥ १३८ ॥

कलासु कुशलाः सर्वे जाताः स्तोकदिनैरपि । राज्ञोऽग्रे सहसाङ्केन मुक्तास्तेऽपि च बालकाः ॥ १३९ ॥

तान् कुमारान् नृपेणोक्तं परीक्षार्थमिति ध्रुवम् । दर्शयन्तु विनोदं भोः ! पुत्राः ! शास्त्रस्य मत्पुरः ॥ १४० ॥

एक एकं प्रत्युवाच—

किं जीविअस्स चिंधं ? का भज्जा होइ मयणरायस्स ?
किं पुप्फाण पहाणं ? परिणीआ किं कुणइ बाला ? ॥ १४१ ॥

अपरेणोत्तरं दत्तमिति-'सासरइजाइ'[1] । पुनः द्वितीयेनोक्तम्—

---

[1] क्रमेण-श्वासः, रतिः, जातिः, समुदायेन चतुर्थप्रश्नस्योतरं भाषायां 'सासरे जाय' ।

शरीरं विगताकारमनुस्वारविवर्जितम् । यदिदं जायते रूपं तत्ते भवतु सर्वदा ॥ १४२ ॥
अपरेणोक्तम्—श्रीरिति ।
पुनरेकेनोक्तम्—
आद्येन हीनं जलधावदृश्यं, मध्येन हीनं भुवि वर्णनीयम् । अन्त्येन हीनं धिनुते शरीरं, यस्याभिधानं स जिनः
अन्येनोत्तरं दत्तम्—शीतल इति [ श्रिये वः ।
पुनः कश्चिदुवाच—जटिलोऽपि न च ब्रह्मा त्रिनेत्रो नैव शंकरः । अम्बुधरो नैव मेघो वनवासी नैव तापसः ॥
चतुर्थेनोत्तरं दत्तम्—नालिकेरमिति ।
इति शास्त्रविनोदं स दृष्ट्वा निजाङ्गजन्मनाम् । हर्षितस्तमुवाचैवं सहसाङ्कं धराधवः ॥ १४५ ॥
तुष्टोऽहं त्वयि सत्प्राज्ञ ! याचस्व वरमीप्सितम् । ययाचे शौल्किकत्वं स ददौ राजापि तत्क्षणम् ॥ १४६ ॥
शौल्किकत्वं गृहीत्वा स स्वानुचरान् प्रजल्पति । अर्द्धदाणं मया मुक्तं तच्चौर्यं त्याज्यमङ्गिभिः ॥ १४७ ॥
इत्यादिघोषणां कृत्वा कुमारस्तत्र तस्थिवान् । सुखेन स्वाधिकारं च पालयामास तत्पुरे ॥ १४८ ॥
अथ तस्मिन्पुरे चौरः समागत्य निरन्तरम् । चौर्य्यं करोति निःशङ्को दुर्जयो दिव्यविद्यया ॥ १४९ ॥
एकदेति महीपालो विज्ञप्तो पुरवासिभिः । अस्माभिश्चौरभीत्या च पुरे स्थातुं न शक्यते ॥ १५० ॥

नृपः श्रुत्वा तलारक्षमाहूयेत्यवदत् ततः । चौरं कर्षय त्वं सद्यो यथाऽत्र स्यात् सुखं नृणाम् ॥ १५१ ॥
इत्युवाच तलारक्षो नरब्रह्ममहानृपम् । विलोकितो मया चौरः परं क्वापि न लभ्यते ॥ १५२ ॥
ततो मन्त्री लसद्बुद्धिर्नरब्रह्ममुवाच तम् । अद्याऽहं तस्करं कर्षे उदित्वा बीडकं धृतम् ॥ १५३ ॥
इति श्रुत्वापि स चौरः प्रधानसदने गतः । दत्त्वाऽवस्वापिनीं निद्रां सर्वेषां गृहवासिनाम् ॥ १५४ ॥
कृत्वा च पश्चिमे द्वारं प्रविष्टस्तत्र तस्करः । गृहनेतेव सर्वत्र ददर्श निर्भयो बली ॥ १५५ ॥
मुक्ताफलानि रत्नानि वस्त्राणि भूषणानि च । अन्यान्यपि च वस्तूनि मुषित्वा तस्करो गतः ॥ १५६ ॥
प्रभातसमये जाते प्रधानो जागृतस्ततः । तदैव स्वगृहे खात्रं दृष्ट्वा मनसि विस्मितः ॥ १५७ ॥
स प्रधानो नृपासन्ने गत्वाऽवदत् पुनः पुनः । न मुक्तं मद्गृहे किञ्चित् चौरेण स्फारबुद्धिना ॥ १५८ ॥
ततोऽवदज्जराजीर्ण्णा नृपं नगरनायिका । वशीकार्यो मया चौरः क्षणेन कपटाद् भृशम् ॥ १५९ ॥
रूपमद्भुतमा ! धृत्वा श्रुत्वा चौरः स बीडकम् । क्रीडां कुर्वन् सुयामिन्यामागतो नायिकागृहे ॥ १६० ॥
कुब्जरूपधरां दासीं दृष्ट्वा चौरेण तत्र च । मुष्टिघातेन सा दासी, सरला विहिता तदा ॥ १६१ ॥
साऽपि स्वस्वामिनीपार्श्वे गत्वा नत्वा च संस्थिता । द्वारस्थितेन केनापि सरला विहिता मुदा ॥ १६२ ॥
नायिकोवाच तं श्रुत्वा दासीमिति पुनः पुनः । त्वमाकारय तं भद्रे ! शीघ्रं सोऽपि समागतः ॥ १६३ ॥
नायिकोवाच भो विद्वन् ! मां कुरु नवयौवनाम् । अर्पिता गुटिका तस्यै शिक्षयित्वेति तेन वै ॥ १६४ ॥

शून्यसद्मनि निर्वस्त्रं स्थातव्यं त्वयकाऽधुना । त्वां यदा कथयिष्येऽहं गन्धनीयेयमद्भुता ॥ १६५ ॥
स नायिकां गृहे क्षिप्त्वा कपाटं दत्तवान् ततः । पश्चात्सर्वाणि वस्तूनि मुषित्वा तस्करोऽवदत् ॥ १६६ ॥
गन्धस्व गुटिकां वृद्धे ! इत्युक्त्वा तस्करो ययौ । सापि वारत्रयं मूलीगन्धिताऽभूच्च रासभी ॥ १६७ ॥
प्रातःकालो यदा जातस्तदा दासी समागता । वृद्धां च रासभीं दृष्ट्वा गत्वा राज्ञे न्यवेदयत् ॥ १६८ ॥
तच्छ्रुत्वा सुभटाः सर्वे तस्मिन्पुरेऽपि हारिताः । तद् बीडकं हि केनापि चौरभीत्या च नाद्दतम् ॥ १६९ ॥
चिन्तितमिति चौरेण कस्मिन् सुवासरे हृदि । अथानयामि भूपस्य पुत्रीमतीव सुन्दराम् ॥ १७० ॥
मध्यरात्रौ समागत्य गृहीता नृपनन्दनी । गत्वा स्वसदने मुक्ता पुत्रीमतीव सुन्दराम् ॥ १७१ ॥
प्रातस्तस्या गृहे चेटी समायाता शुभानना । नो दृष्ट्वा तत्र तां बाला—मित्यवोचन्नृपान्तिके ॥ १७२ ॥
स्वपुत्रीहरणं ज्ञात्वा पटहोद्घोषणं कृतम् । यो ह्यानयति मत्पुत्रीं लभते तां सलक्ष्मीकाम् ॥ १७३ ॥
सहसाङ्केन तं श्रुत्वा गृहीतः पटहस्ततः । नृपते ! स्मर जिनाधीश—मागच्छति यथा सुता ॥ १७४ ॥
पुनरूचे नृपस्याग्रे सहसाङ्कः स्वबुद्धिना । चौरस्य बन्धनं कृत्वा—ऽऽनेष्यामि हि तवात्मजाम् ॥ १७५ ॥
यतः—यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् । वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥ १७६ ॥
उद्यमः साहसं धैर्यं बलं बुद्धि—पराक्रमम् । षडेते यस्य विद्यन्ते, तस्य दैवोऽपि शङ्कते ॥ १७७ ॥

उदित्वेति कुमारस्तं स्वसदने समागतः । प्रत्युद्घाट्य स्वभण्डारान् प्रच्छन्नः संस्थितो निशि ॥ १७८ ॥
परविद्याविनाशिनीं स्मरन् चित्ते स हर्षितः । स्वकीयमदृश्यरूपं कृत्वा तत्र च तस्थिवान् ॥ १७९ ॥
तस्मिन्नवसरे चौर आगत्य तस्य सद्मनि । सर्वेषामवस्वापिनी–निद्रां ददौ स निर्भयः ॥ १८० ॥
कुमारविद्यया जाता–ऽवस्वापिनी च निष्फला । दृष्टं सर्वं कुमारेण न च चौरेण स पुमान् ॥ १८१ ॥
ततः सर्वाणि वस्तूनि गृहीत्वा तस्करो व्रजन् । दृष्टस्तेन कुमारेण सोऽपि चचाल पृष्ठतः ॥ १८२ ॥
गुफामुद्घाट्य चौरोऽसौ धनं मुक्त्वा च तत्क्षणम् । इत्युवाच कुमारीं तां भुङ्क्ष्व भोगान्मया सह ॥ १८३ ॥
चौरमूचे कुमारी सा श्रुत्वेति वचनं कटु । बलात्कारेण सत्प्रीतिर्नो भवति कदाचन ॥ १८४ ॥
यतः–कविता वनिता गीतिः, स्वयमेवागता वरम् । बलादाकर्षमाणा हि सरसा विरसा भवेत् ॥ १८५ ॥
श्रुत्वा तद्वचनं चौरो भीमखड्गेन सत्वरम् । केशपाशं करे कृत्वा तां प्रहर्तुं समुत्थितः ॥ १८६ ॥
तद् दृष्ट्वा सहसाङ्कश्च खड्गं धृत्वा करेऽवदत् । तस्कर ! मां समागच्छ यदि त्वं बलवानसि ॥ १८७ ॥
श्रुत्वा विमुच्य तां चौरो, गतः कुमारसन्निधौ । कुमार–चौरयोर्युद्ध–मभूत्तत्र भयङ्करम् ॥ १८८ ॥
दृढं बद्धः कुमारेण तस्करो बलवानपि । करगृहीतनिस्त्रिंशः सत्त्वात् किं लभते न हि ? ॥ १८९ ॥
यतः—विजेतव्या लङ्का चरणतरणीयो जलनिधिर्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं, क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ १९० ॥

घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो, वने वासः कन्दाशनमपि च दुःस्थं वपुरिदम् ।
तथाऽप्येकोऽगस्त्यः सकलमपिबद् वारिधिजलं क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ १९१ ॥
सुभटश्रेणिकोटीरः कुमारो नृपसन्निधौ । प्रत्यूषसमये गत्वा सद्यस्तावार्पयद् भृशम् ॥ १९२ ॥
यत्तस्करेण तद्ग्रामे गृहीतं वस्तु विश्रुतम् । तत्सर्वं जनतावृन्दैः गृहीतं श्रीनृपाज्ञया ॥ १९३ ॥
जनाः सर्वेऽपि सन्तुष्टाः कुमारायाशिषं ददुः । दृष्ट्वा तस्य कुमारस्य कार्यमेतद्वरीयसम् ॥ १९४ ॥
स्वयंऽवस्वापिनी विद्या तालकोद्घाटनी तथा । तथा रूपकरी विद्या विदुषां वल्लभा सदा ॥ १९५ ॥
चतस्त्रस्तस्करादेता विद्या जग्राह तत्क्षणम् । कुमारसहसाङ्को हि सत्त्ववान् सुजनप्रियः ॥ १९६ ॥
कुमारानुग्रहाद्राज्ञा कर्षितो देशतो बहिः । अवध्य इति निश्चित्य तस्करो निजचेतसि ॥ १९७ ॥
नगर्या जयकारो हि तस्मिन् जातो विशेषतः । तस्करकर्षणादेव कुमारोऽपि स हर्षितः ॥ १९८ ॥
नरब्रह्मोऽपि सः पश्चात् सहसाङ्कमिति जल्पिवान् । त्वमुद्वाहय सल्लग्ने मे पुत्रीं श्रीसमन्विताम् ॥ १९९ ॥
राजानं सहसाङ्कश्च प्रोचे भाग्यपुरन्दरः । साम्प्रतं नियमः सम्यग् मया कृतोऽस्ति भावतः ॥ २०० ॥
एकदा चिन्तयामास सहसाङ्कः स्वचेतसि । मृगाङ्को मे पतिर्वर्यः समेष्यति कदाऽत्र वै ? ॥ २०१ ॥
क्रमेण सिंहलद्वीपात् सन्मृगाङ्कः समागतः । उपविश्य तरण्डे हि भृते वस्तुविशेषकैः ॥ २०२ ॥

सुसुमारपुरं ज्ञात्वा रक्षयित्वा च पोतकम् । तस्मादुत्तरितः श्रेष्ठी मृगाङ्को गुणनीरधिः ॥ २०३ ॥
कुसुमसारस्य पुत्रो मृगाङ्कोऽत्र समागतः । कथितं सहसाङ्काग्र इति स्वानुचरेण च ॥ २०४ ॥
मृगाङ्ककुमरः सोऽप्युपायनं गृहीत्वा ततः । आगतो विनयं कुर्वन् गत्या तर्जितवारणः ॥ २०५ ॥
सहसाङ्कः स्वभर्त्तारं दृष्ट्वाऽऽसनात्समुत्थितः । सन्मुखोऽपि गतस्तस्य विनयार्थं च शुद्धधीः ॥ २०६ ॥
यतः—केनाञ्जितानि नयनानि मृगाङ्गनानां, कश्चोत्पलेषु दलसञ्चयमातनोति? ।
को वा करोति रुचिराङ्गरुहान् मयूरान्, को वा करोति विनयं कुलजेषु पुंसु? ॥ २०७ ॥
विनयं राजपुत्रेभ्यः पण्डितेभ्यः सुभाषितम् । अनृतं द्यूतकारेभ्यः स्त्रीभ्यः शिक्षेत कैतवम् ॥ २०८ ॥
इत्यूचे सहसाङ्कोऽसौ कुसुमसारनन्दनम् । तवाननं निरीक्ष्याहं हर्षितः पूर्वरागतः ॥ २०९ ॥
तत्कारणाद् मया मुक्तं तवार्द्धदाणमेव च । त्वां वारयाम्यहं श्रेष्ठिन्! न कार्या दाणतस्करी ॥ २१० ॥
लेखं विलिख्य वस्तूनि जग्राह शौल्किकः शुभः । लिखनादधिकं पोते, दृष्ट्वा बभूव कोपभाक् ॥ २११ ॥
सद्यैनं बन्धयध्वं च श्रेष्ठिनं दाणतस्करम् । शौल्किकश्च हि भो लोका ! इत्यादिशत् स्वमानुषान् ॥ २१२ ॥
दृढं बद्ध्वा तदादेशाद् मृगाङ्कं तस्य सेवकैः । स्वगृहे च समानीतं मुषित्वा तत्तरण्डकम् ॥ २१३ ॥
क्रोधेनाऽरुणमाकृत्य लोचनमवदत्पुनः । यष्टिमुष्टिप्रहारैश्चैनं मारयत भो जनाः ! ॥ २१४ ॥
मम चित्ते महान्कोपो वर्त्तते भो विचक्षण ! । किं करोमि परं स्वामि–न्न मोक्ष्ये त्वामतः परम् ॥ २१५ ॥

इत्युक्त्वा सहसाङ्कोऽसौ चचाल निजमन्दिरे । पोतेश! भोजनं रम्यं करिष्यसे हि मद्गृहे ॥ २१६ ॥
तेनोक्तं मांडवीनाथ! वाञ्छितं कथितं त्वया । ततः सोपि च तत्सार्द्धं भोजनाय गतः खलु ॥ २१७ ॥
यतः—अभिमतमहामानग्रन्थिप्रभेदपटीयसी, गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीवितानकुठारिका, जठरपिठरी दुष्पूरेयं करोति विडम्बनाम् ॥ २१८ ॥
सहसाङ्कः स्वहस्तेन चकाराऽथ सुभोजनम् । घृतपूरैः समायुक्तं प्राणिनां मधुरैः सदा ॥ २१९ ॥
तप्तिहरैश्च सत्तारैः कुष्माण्डपाककैर्वरम् । मोददं सततं रम्यं सिंहकेसरमोदकैः ॥ २२० ॥
सर्वपक्वान्नसंयुक्तं सुराणां सुरभि ध्रुवम् । हरमशेषरोगाणां कलितं लापनश्रिया ॥ २२२ ॥
यतः—दुग्धं गोधूमचूर्णं घृतगुडसहितं नालिकेरस्य खण्डं, द्राक्षा—खर्जूर-सुण्ठि-तज-मरिचयुतं पेशलं नागपुष्पम् ।
पक्वं ताम्रे कटाहे तलवितमतूलं पावके मन्दकान्तौ, धन्या हेमन्तकाले प्रचुरघृतयुता भुञ्जते लापनश्रीः ॥२२२॥
निर्मलक्षीरसत्खण्ड—प्राज्याज्यपूर्विकान्वितम् । प्रविष्टाऽन्धो—विदालिभ्यां राजितं दोषवर्जितम् ॥ २२३ ॥
इत्थम्भूते मनोज्ञे च क्रियमाणे सुभोजने । पूर्वः स्वादस्तदा प्राप्तः मृगाङ्केनाऽतिबुद्धिना ॥ २२४ ॥
तेनास्वादेन चित्ते च कुमारोऽवगमत्तदा । इयं पद्मावती चास्ति किंवा नास्ति च वल्लभा ॥ २२५ ॥
या तु मया वने मुक्ता समायात्यत्र सा कथम्? । एषस्तु शौल्किको नूनं नररूपेण दृश्यते ॥ २२६ ॥

सो भव्यं भोजनं भुक्त्वा वचसेत्यवदत्ततः । मां सहसाङ्क! मुञ्चस्व कृपया दीनमन्दिरम् ॥ २२७ ॥
श्रेष्ठिनं तं कलाधाम–सहसाङ्कः प्रजल्पिवान् । यावत्त्वं जीवसि भव्य ! तावत्पार्श्वं न मुच्यते ॥ २२८ ॥
मृगाङ्क ! त्वं सदा दीन–मन्तुमानसि मे भृशम् । तेनाहं ताडयिष्यामि महद्दण्डेन पाणिना ॥ २२९ ॥
श्रेष्ठिनं बन्धयित्वोर्द्ध्वं ताडयन्तु पुरो धृतम् । एतादृशीं मुखे भीति–मदर्शयत् पुनः पुनः ॥ २३० ॥
नृपेण निजकर्णान्ते एतत्सर्वं यदा श्रुतम् । मुञ्चापितश्च वेगेन मृगाङ्कः कृपया तदा ॥ २३१ ॥
नृपस्य वचनान्मुक्तो मुत्कलो व्यावहारिकः । प्रतिज्ञामिति निश्चित्य न गन्तव्यं मया विना ॥ २३२ ॥
दासो भूत्वा मृगाङ्को हि स दैन्यमदधत् तदा । अन्यत्कृत्यानि नीचानि चकार सोऽपि सर्वदा ॥ २३३ ॥
एकस्मिन् दिवसे श्रेष्ठी करौ नियोज्य संस्थितः । शौल्किकेन तदा दृष्टो नयनोत्पन्नरागतः ॥ २३४ ॥
प्रसन्नचित्तं विज्ञाय विज्ञप्तिमिति सोऽकरोत् । त्वमाशु दीनसंस्थाय–मधुना मुञ्च मां प्रति ॥ २३५ ॥
अहं यावत् चिरं जीवी त्वां न मुञ्चामि तावतः । मन्तुमन्दिरमध्यस्थं दुष्टधीधनधारकम् ॥ २३६ ॥
मत्पदोर्यदि त्वं श्रेष्ठिन् ! शोषयेर्घृतसत्पलम् । तदा त्वां सादरात्सद्यो मुञ्चामि ग्रामबन्धनात् ॥ २३७ ॥
अङ्गीचकार स श्रेष्ठी पूर्वं यद् भणितं वचः । पश्चात् शय्यां महारम्यां सुप्तो हि प्रति शौल्किकः ॥ २३८ ॥
ततः परं मृगाङ्को हि चकार घृतमर्द्दनम् । इतः कैतवतस्तन्द्रा शौल्किकेन कृता परा ॥ २३९ ॥
पदस्पर्शवशादाज्यं विग्घरितं च भाजने । अथ शोषमुपैति न मृगाङ्केनेति चिन्तितम् ॥ २४० ॥

घोरनिद्रावशीभूतं ज्ञात्वा शौल्किकमुद्धतम् । पश्चाद् मृगाङ्कश्रेष्ठिना दत्तमाज्यं मुखे भृशम् ॥ २४१ ॥
सहसाङ्केन सद्यस्कं ततः क्रोधेन जल्पितम् । रे ! रे ! रङ्क महारङ्क ! जठरस्यैव पूरकः ॥ २४२ ॥
बद्धाञ्जलिं मृगाङ्को हि जल्पति प्रतिदुःखतः । तेऽहं महापराधीनो यथा रुचिस्तथा कुरु ॥ २४३ ॥
सहसाङ्कस्तदा जातः पद्मावती मनोहरा । रचयित्वा च श्रृङ्गारं नवसप्तादिकमद्भुतम् ॥ २४४ ॥
यतः–आदौ मज्जनचारुचीरतिलकं नेत्राञ्जनं कुण्डले । नासामौक्तिकपुष्पहारधवलं झङ्कारकौ नूपुरौ ॥
अङ्गे चन्दनलेपकं कुचमणिः क्षुद्रावली घण्टिका । ताम्बूलं करकङ्कणं चतुरता श्रृङ्गारकाः षोडश ॥ २४५ ॥
पश्चात्प्रणम्य सा बाला मृगाङ्कमिति जल्पिवान् । तेऽहं महापराधीनी पादोपानहसदृशी ॥ २४६ ॥
यतः–गोरी तेतो मान करि जेतो अंग समाय । जो लष्यणीया नही तो पहरीज्जइ पाय ॥ २४७ ॥
परस्परं स्ववृत्तान्तं श्रुत्वा सन्तोषमापतुः । नृपोऽप्येति प्रवृत्तिं च श्रुत्वा हर्षमुपागतः ॥ २४८ ॥
हर्षेण तौ सुखं पश्चाद् भोजयामासतुर्मिथः । नृपेण चिन्तितं चित्ते सुतां ददामि संप्रति ॥ २४९ ॥
धराधीशेन पुत्री सा समं तेन विवाहिता । अर्द्धं राज्यं च रत्नानि स्वर्णानि च ददौ ततः ॥ २५० ॥
दिनानि कत्यपि स्थित्वा वाराणसीं चचाल सः । प्राप्तं च तत्पुरं रम्यं स्तोकैरेव दिनैरपि ॥ २५१ ॥
मातृपित्रोः पदद्वन्द्वं नत्वा नत्वाऽतिरागतः । चकार मिलनं पश्चात् मृगाङ्को हि परस्परम् ॥ २५२ ॥

स्ववेश्मनि सुखं भुञ्जन् श्रेष्ठः कुसुमसारसूः । तस्थिवान् ललनाद्वन्द्वैः संयुतः स्नेहभाजनैः ॥ २५३ ॥
इतश्च तस्यां वाराणस्यां मकरध्वजो नृपः । वर्त्तते विश्वविश्वेशः पुत्ररत्नविवर्जितः ॥ २५४ ॥
यतः—घरअं गणंमिं मसाणं जत्थ न दीसति धूलिधूसरच्छायं ।
अडंति पडंति रडंतडाइं दो तिन्न डिंभाइं न दीसंति ॥ २५५ ॥
एकोऽपि यः सकलकार्यविधौ समर्थः, सत्त्वाधिको भवति किं बहुभिः प्रसूतैः ।
तारागणः समुदितोऽप्यसमर्थ एव, चन्द्रः प्रकाशयति दिग्मुखमण्डलानि ॥ २५६ ॥
तेन राज्ञा मृगाङ्कस्य वृत्तान्तो मूलतः श्रुतः । तदेति चिन्ततं चित्ते मत्पुत्रीशो भवत्वयं ॥ २५७ ॥
विचिन्त्येति नृपेणैवं स्वराज्यं च निजां सुताम् । अत्याडम्बरतो दत्त्वा स्वयं हि व्रतमाददे ॥ २५८ ॥
पश्चान्मृगाङ्कभूपालः पालयामास राजतां । अनेकभटसन्दोहैः संयुतः सारविक्रमः ॥ २५९ ॥
कियत्यपि गते वर्षे ग्रामोपान्तवनान्तरे । आगता मतिपूर्णाश्च मतिसागरसूरयः ॥ २६० ॥
तदेत्युक्तं वनाधीशैर्गत्वा मृगाङ्कसन्निधौ । उत्तरिता वने सन्ति मतिसागरसूरयः ॥ २६१ ॥
तच्छ्रुत्वा हृष्टमनसा मृगाङ्केनैव सत्वरम् । दत्तानि वनपालाय वस्त्राणि भूषणानि च ॥ २६२ ॥
ततश्चचाल तत्स्थानात् भूपालोऽद्भुतभावतः । संयुतः सर्वलोकौघैर्वन्दित्वा निषसाद सः ॥ २६३ ॥
पश्चात्सूरिर्महारम्या—मारेभे धर्मदेशनाम् । श्रोत्रयोः सुखदां नित्यं भव्याम्भोरुहभासिनीम् ॥ २६४ ॥

देशनान्ते मृगाङ्कोऽपि पप्रच्छ स्वामिनं प्रति । कथं लब्धा गता लक्ष्मीः पुनः प्राप्तेति कारणं ॥ २६५ ॥
स्वाम्यूचे भववृत्तान्तं पुरे गुणपुराभिधे । हंसपालाभिधो क्षत्री पत्नी लीलावती वरा ॥ २६६ ॥
एकस्मिन् वासरे त्वं हि परदेशेषु जग्मिवान् । धनोपार्जनकार्यार्थ–मुत्कलाप्य मृगेक्षणाम् ॥ २६७ ॥
भ्रमितः सर्वदेशे त्वं नाप्तं किंचिद् धनं त्वया । पश्चात् त्वं प्रति संस्त्यायं चलितः प्रेमप्रेरितः ॥ २६८ ॥
मार्गेऽप्यागच्छता दृष्टः श्वेतपुष्पपलाशकः । तन्मूले खनिते आप्तं भाण्डं द्रव्यसमन्वितम् ॥ २६९ ॥
क्रमेण सदने गत्वा कान्तायै भाण्डमर्पितम् । सा प्राप परमानन्दं विवेकविनयान्विता ॥ २७० ॥
तया हि परमान्नं च कृतं भोजनमुत्तमम् । तस्मिन् मासोपवासी चा—ऽऽगतः सद्मनि पुण्यतः ॥ २७१ ॥
ततो भूयोऽर्थयित्वा च प्रदत्तं क्षीरभोजनम् । पश्चादिति कुभावश्च जातो दत्तं मया वृथा ॥ २७२ ॥
हंसपालेन तेनापि कुभाव इति चिन्तितः । धिक् कान्ते ! मां हि मुक्त्वा च प्रदत्तं भोजनं मुनेः ॥ २७३ ॥
पुनर्द्वन्द्वस्य सद्भावः समुत्पन्नः समं हृदि । इदं वर्यं कृतं कान्ते ! परस्परं प्रशंसतः ॥ २७४ ॥
सम्यक्त्वमूलमापन्नौ क्रमेण गुरुसन्निधौ । धर्म्मकृत्यान्वितौ जातौ द्वावपि सततं तदा ॥ २७५ ॥
ततस्तौ च सुरागारे पालयित्वा निजायुषम् । जग्मतुर्द्वौ सदाकारौ पूर्वपुण्यानुभावतः ॥ २७६ ॥
देवलोकान्मृगाङ्कत्वे—नोत्पन्नः श्रेष्ठिनो गृहे । लीलावत्यपि संजाता श्रेष्ठिनः सदने सुता ॥ २७७ ॥

पूर्वरागेण सम्बन्धो मिलितो हि परस्परम् । पात्रदानात्सुखमाप्त—मसुखं तु कुभावतः ॥ २७८ ॥
पुनः सुखं हि सद्भावात् संप्राप्तं वसुधाधिप ! । देशनामिति श्रुत्वा स धर्मं चकार भावतः ॥ २७९ ॥
जीर्णोद्धारप्रतिष्ठादि जिनबिम्ब–जिनालयम् । इत्यादिधर्मकृत्यानि चकार धरणीपतिः ॥ २८० ॥
एकस्मिन् समये च्युत्वा द्वादशे हि दिवालये । द्वावपि दुष्टसंसाराद् जग्मतुः सुखहेतवे ॥ २८१ ॥
पुनः स्वर्गात् समागत्य भुक्त्वा च मानुषं भवं । मृगाङ्को मुक्तिगेहे हि मानिन्या सह यास्यति ॥ २८२ ॥
एवं विभाव्य भो भव्याः ! दानं दत्त सुभावतः । पात्रापात्रे यथा शक्त्या निदानं सुखसन्ततेः ॥ २८३ ॥
श्रीमत्तपगणगगने गगनमणिर्विजयसेनसूरीशः । तस्यानुक्रमपट्टे गुरुर्विजयदेवसूरिवरः ॥ २८४ ॥
तद्गच्छे सततं जयन्तु सुखदाः श्रीभानुचन्द्राश्चिरम् । षण्मासाऽभयदायकाः क्षितिपतिं दिल्लीपतिं पेशलम् ॥
सद्वाग्भिः प्रतिबोध्य शास्त्रजलधेः पारंगता भूतले । तीर्थेशाऽकरकारका गतगदाः प्राग्भारपुण्योत्कराः २८५
तस्य वर्यपदाम्भोज–शिलीमुखानुकारिणा । सपर्यासक्तचित्तेन ऋधिचन्द्रेण निर्मितम् ॥ २८६ ॥
इदं विश्वे प्रसिद्धस्य भावाम्भोरुहभास्वतः । सच्चरित्रं मृगाङ्कस्य श्लोकाभ्यासनहेतवे ॥ २८७ ॥
पण्डितव्राजकोटीरैरुदयचन्द्रधीधनैः । शुद्धीकृतमिदं सम्यक् चरित्रं चित्तसात्कृतम् ॥ २८८ ॥

॥ इति श्रीमृगाङ्कचरित्रं समाप्तम् ॥